ग्रन्थिकसिन्धुजमागधिचव्यचित्रकविश्वशिवाः क्रमवृद्धया ।
पण्डितराजरघूत्तममान्यं विद्धि परं वडवानलचूर्णम् ॥६॥

सामुद्रं यवजयवानिकाजमोदाः
सिन्धूत्थं कृमिरिपुहिङ्गु विश्वकृष्णाः ।
पथ्या वा [1]रुचकमिदं समं च पिष्ट्वा
संसेव्यं जठरभवे च वातरोगे ॥७॥

वातमेहे श्वासकासे कामलापाण्डुवजीर्णके ।
गुदगुल्मानिले योज्यं विषूच्यां विषमानिले ॥८॥

शिवाकरञ्जचित्रकं कणाविडङ्गविश्वकम् ।
[2]सशर्करासमांशकं त्ववेहि वाडवाग्निकम् ॥९॥

अम्लवेतसधनञ्जयवह्निमोरटास्तदनु सूरण एषः ।
पञ्चवह्नि जठरानलवृद्धयै[3] तक्रसाकमिदमाशु हि पेयम् ॥१०॥

[illegible]ं त्रिफला च यवानी त्र्यूषणरामठमेवमशेषम् ।
[illegible]डमिश्रितमाशु हन्ति हि जाठरपावकमान्द्यम् ॥११॥

[illegible]कं कटुत्रिकाजमोदकम् ।
[illegible]ं निषेव्य रामठाभिधम् ॥१२॥

[illegible]सर्पिषा चूर्णमुत्तमम् ।
[illegible] भेदकं [illegible]वातगुल्महरं परम् ॥१३॥

[illegible]ति वल्ली गुड[illegible] दीप्यकृष्णामहौषधम् ।
[illegible] शिवा वैश्वानराभिधम् ॥१४॥

प्रवृद्ध[illegible]
हिङ्गुक्षारयुगलस[illegible]जमोदा—
कर्चूरं [6]रुचकमरीचपञ्चकोलम् ।
षड्ग्रन्था बिडकबरी[7] च तिन्तिडीकं
पथ्या जीरककरकाम्लवेतसं च ॥१५॥

धान्यं पुष्करहपुषे इदं समांशं
गुल्मार्शःश्वसनविबन्धशूलपाण्डून्[8] ।
आध्मानं प्लिहमुखपाककण्ठरोधं
हृद्रोगं शमयति [9]सिध्ममूत्रकृच्छ्रम् ॥१६॥

विषूचिकाचिकित्सा

[10]रुचकसैन्धवजीररसोनकं त्रिकटु रामठचूर्णविमिश्रितम् ।
[11]रुचिरनिम्बुरसेन[12] विभावितं सकलमाशु निहन्ति विषूचिकाम् ॥१७॥

---

१. 'रुचिकरमिदं'–अ, 'रुचिकामिदं'–आ. २. '०र्करं'–अ. ३. '०द्धै'–अ, आ. ४. 'जाठरा०'—आ. ५. 'च यावानि'–अ, आ. ६. 'चुरक०'–आ, 'रुचिक०'–आ. ७. '०करीं'–अ, आ. ८. '०विट्बन्ध०'–आ. ९. 'हिध्म०'–अ, आ. १०. 'रुचिक०'–अ, आ. ११. 'रुचिक०'–अ. १२. '०निम्ब०'—अ, आ.

मरिचं पर्पटीक्षारं प्रत्येकं च पलं पलम् ।
क्वथितं [1]रसयेत्तूर्णं विषूचीशूलवारणम् ॥१८॥

क्रमिचिकित्सा

नियमनः [2]कुटजस्त्रिफला वचा त्रिकटुकं खदिरस्त्रिवृता युतम् ।
मुनिदिनं हि गवां सलिलेन च शृतमिदं क्रमिनाशकरं पिबेत् ॥१९॥
जलदमूषकर्कणिफलत्रिकामरकशिग्रुभवं[3] हरते शृतम् ।
मगधजाक्रमिवैरिविमिश्रितं क्रमिरुजं द्विपथेन गतान्क्रमीन् ॥२०॥

पाण्डुरोगचिकित्सा

त्रिफला त्र्यूषणं वेल्लं [4]मेघचित्रकतीक्ष्णकम् ।
मधुना लेहयेच्चूर्णमिदं ज्ञेयं नवायसम् ॥२१॥
अग्निमान्द्ये कोष्ठरोगे स्थौल्ये[5] जठरतासु च [illegible]
प्रमेहे पिटिकानस्ये[6] पाण्डुरोगे नवायसम् [illegible]४
[7]लोहकटुत्रिककोलतिलानां [8]चूर्णसमं [illegible]
क्षौद्रयुतं च सतक्रमवेहि पाण्डुगदे [illegible]
सुराब्ददार्वीकटुषट्कताप्यं वेल्लं व[illegible]ादि[illegible] ॥१२॥
मण्डूरभागद्वयमष्टमूत्रे पक्त्वा गवां [illegible] ।
[10]शोथकुष्ठकफप्लीहकामलापाण्डुमेहकम् [illegible]
ऊरुस्तम्भं [12]हन्त्यजीर्णमर्शसां च नि[illegible]म् [illegible]॥

कामलाचिकित्सा

त्रिफलानिम्बकैरातितिक्तावासामृताभवः ।
क्वाथो मधुयुतो हन्ति कामलां पाण्डुतामपि ॥२६॥
हरीतकी च धात्रिका तथा गिरीन्द्रमृत्तिका ।
इति प्रयोजिताञ्जनं निहन्ति कामलाननम्[13] ॥२७॥
वेणीफलरसः सृष्टो [14]नस्यतो विनिहन्ति च ।
कामलां कामलोपेतां शतशोऽनुमतं[15] त्विदम् ॥२८॥

इति श्रीकविकुलावतंसश्रीकृष्णपण्डितसूनुश्रीमद्धिकंभट्टसूरिसुतश्रीमद्रघुनाथपण्डितकविविरचितायां राघवीयायां चिकित्सामञ्जर्यामजीर्णादिचिकित्सा नाम तृतीयं कुसुमम् ॥३॥

---

१. 'रसपेतूर्णं'—अ, आ. २. 'कुटजं'–आ. ३. '०कांमर०'–अ, आ. ४. 'मेथा०'–अ. ५. 'स्थूले'—अ, आ. ६. 'पिठिकानस्यो'—अ, आ. ७. 'लोहं'—अ, आ. ८. 'चूर्णं'—अ, आ. ९. '०कालाग०'–अ, आ. १०. 'शोतकुष्ट०'—अ, आ. ११. '०पाटला०'—अ, आ. १२. 'तथाजीर्णर्षमसां'–अ, आ. १३. '०लाननाम्'–अ, आ. १४. 'निस्यतो'–अ, आ. १५. '०मितं'—अ, आ.

चतुर्थं कुसुमम्

रक्तपित्तचिकित्सा

त्रिफलाकृतमालभवं क्वथनं सितया मधुना मिलितं हरति ।
ननु शोणितपित्तमिदं सरुजां[1] घनदाहकपित्तजशूलदरम् ।।१।।
मृद्वीकावृषपथ्यानां क्वाथः क्षौद्रसितायुतः ।
कासश्वासक्षयश्लेष्मरक्तपित्तविदारकः ।।२।।
कुञ्जराशनोदुम्बरं फलं रक्तपित्तकं हन्ति सादरम् ।
वासया तथा क्षौद्रमिश्रया व्याहृतः परो योगनायकः ।।३।।

क्षयचिकित्सा

नवो[illegible]तं च माक्षिकं सुखण्डकं त्रयं त्विदम् ।
[illegible]त्तमं क्षयाद्रिदारकं पविम् ।।४।।
[illegible] वासायाः स्वरसं पिबेत् ।
[illegible] भास्करेण तमो यथा ।।५।।

[illegible]सचिकित्सा

[illegible]टाकटुत्रिकम् ।
[illegible] कासमारुतम् ।।६।।
चपलास[illegible]षायः कासहा भवेत् ।
वासाशृतं मधुयुत [illegible]घ्नमथ वापि च ।।७।।
कटुत्रिकं छिन्नलताक्कशानू फलत्रिकं वेल्लभवं सरास्नम् ।
सशर्करं चूर्णमिदं हि सेव्यं कासाटवीदाहदवानलाख्यम् ।।८।।
ग्रथितमागधिकाक्षमहौषधैं रचितचूर्णमिदं मधुना युतम् ।
हरति कासभवं दरमाततमनुमतं[2] रघुनाथमनीषिणा[3] ।।९।।
कटुत्रिकं च चूर्णितं गुडेन सर्पिषा युतम् ।
निहन्ति कासजं दरं निषेवणान्निरन्तरम् ।।१०।।
[4]पुष्पाक्षवल्लिजसमः खदिरस्य सारो
[5]बब्बूलसंभवकषायविमिश्रितश्च ।
एषां कृता च वटिका प्रहरात्प्रयुक्ता
कासं निहन्ति रघुनाथकवीन्द्रमान्या ।।११।।

हिक्काचिकित्सा

मागधीरेणुकाक्वाथो हिङ्गुचूर्णेन मिश्रितः ।
पीयमानो निहन्त्याशु हिक्कां पञ्चविधां यतः ।।१२।।

---

१. '०रुजं'—अ, आ. २. '०मितं'—अ, आ. ३. '०षिणाम्'—अ, आ. ४. 'पुष्पा०'—अ, आ. ५. 'बर्बुळ०'—अ, आ.

श्वासचिकित्सा

सिंहीनिशासिंहमुखीगुडूचीविश्वोपकुल्याभृगुजाघनानाम् ।
कृष्णामरीचैर्मिलितः कषायः श्वासाटवीदाहहुताश एषः ॥१३॥
कटुतैलगुडाभ्यां च श्वासो नश्यति तत्क्षणात् ।
भार्ङ्गीपुष्करमूलं च मधुना श्वासहन्तृ च ॥१४॥

कासश्वासचिकित्सा

राजिका क्षीरकन्दश्च चपला च रसोनकः ।
[1]ऊषणातिविषा देवकुसुमं च विचूर्णितम् ॥१५॥
मार्कवार्ककुमारीभिर्निर्गुण्डीमुण्डिचित्रकैः ।
भावयित्वा पृथक्सर्वं श्वासकासनिकृन्तनम् ॥१६॥
अक्षात्पलशतं ग्राह्यं त्वजामूत्रं च तत्समम् ।
कृतावलेहो मधुना श्वासं कासं निहन्ति च ॥१७॥

अरोचकचिकित्सा

त्र्यूषणं[2] कपित्थं च शर्करारोचके च तै[illegible]
क्षौद्रसंमितां भक्षयेच्च तां मानिता च [illegible]ादि[illegible]
तृटित्वक्केसरं[4] [5]पुष्पं वल्लिजं सकण[illegible] ॥१२॥
समखण्डं भागवृद्धं [6]चूर्णं तद्[6] भक्षयेद् [illegible]
श्वासकासप्रसेकेषु हृत्पार्श्वारुचिजे[7] गदे [illegible]
गलामये प्रशस्तं च रघुनाथेन मानितम् ॥२०॥

छर्दिचिकित्सा

एला मेघः[8] कोलमज्जाप्रियङ्गुलाजाः कृष्णा चन्दनं पुष्पनागम् ।
हन्याच्चूर्णं क्षौद्रखण्डेन युक्तं पित्तश्लेष्मच्छर्दिकां वातजां[9] च ॥२१॥
सुरसास्वरसैर्युक्ता तृटिका मर्दिता भृशम् ।
वान्तिं शमयति क्षिप्रं वातपित्तकफोद्भवाम्[10] ॥२२॥
कृष्णोशीरमरीचं च कपित्थरसभावितम्[11] ।
तुल्यलाजैश्च क्षौद्रेण लीढं छर्दिहरं परम् ॥२३॥
[12]संदग्धं शिखिपिच्छं च मधुना छर्दिनाशनम् ।
फलपूररसश्चैव छर्दिघ्नो मधुना युतः ॥२४॥

---

१. 'दुष०'—अ, आ. २. अत उत्तरं 'च' इति पदमधिकम् अ आ पुस्तकयोः. ३. '०द्वटी'—अ, आ. ४. '०शरं'—अ, आ. ५. 'पुष्यं'—अ, आ. ६. पदद्वयं नास्ति अ पुस्तके. ७. '०चिरे'—अ, आ. ८. 'मेघं'—अ, आ. ९. '०तजं'—अ, आ. १०. '०द्भवा'—अ, आ. ११. '०विताम्'—अ, आ. १२. 'सद०'—अ, आ.

तृष्णाचिकित्सा

उत्पलं मधु लाजाश्च वटरोहो गदस्तथा ।
एतैः कृता वटी सम्यक् तृषं नाशयति क्षणात् ॥२५॥

वातरक्तादिचिकित्सा

मञ्जिष्ठागौरीवरादेवदारुनिम्बच्छिन्नारोहिणीक्वाथ एषः ।
हन्यात्पामां वातरक्तं कपालीं तद्वत्कुष्ठं मण्डलं रक्तजन्यम् ॥२६॥
मञ्जिष्ठात्रिफलापटोलकटुकामूर्वावचाचन्दनै—
स्त्रायन्तीन्द्रयवासनामृतलताकृष्णात्रिवृन्नागरैः ।
दार्वीनिम्बविडङ्गमार्कवजलैर्भार्ङ्गीविशालाघनै—
र्गायत्रीगदसारिवाप्रतिविषानन्तामहादारुभिः ॥२७॥
[illegible]टकशार्वरीवरुणकैः पाठावरीपांसुभिः
[illegible]मराजिकुटजाचित्रामहानिम्बकैः ।
[illegible]करञ्जतिक्तकयुतैः शौण्डीपुरैर्मिश्रितो
[illegible]रक्तविकृतिं कुष्ठानि चाष्टादश ॥२८॥
[illegible]प्रसुप्ते पक्षघातके ।
[illegible]भेदकेऽस्त्रोषे विद्रधौ मतः ॥२९॥
[illegible] वल्ल[illegible] गुड[illegible]

[illegible]ऊरुस्तम्भचिकित्सा

भल्ला[illegible]धारापुनर्नवादारुमहौषधैश्च[1] ।
ऊरुद्वयस्तम्भकृते कषायो [2]गवां हि मूत्रेण [3]पुरेण योज्यः ॥३०॥

आमवातचिकित्सा

रास्नामृतानागरवातशत्रुकटङ्कटेरीजनितः कषायः ।
सर्वाङ्गसंस्थं[4] मुनिधातुगं[5] च निहन्त्यशेषं सहसामवातम् ॥३१॥
रास्नागुडूचीपवनारिदारुपुनर्नवागोक्षुरराजजातम्[6] ।
विश्वाविमिश्रं शृतमामवातं जङ्घाकटीपृष्ठगतं निहन्ति ॥३२॥
महौषधामृताभवः कषायकश्च सेवितः ।
निहन्ति चाममारुतं चिराय संधिसंस्थितम् ॥३३॥

शूलचिकित्सा

शतपुष्पसुरद्रुदिनेशपयोगदरामठसिन्धुभवं हरति ।
अपि लेपनतोऽस्थिभवं[7] मरुतं रघुनाथबुधानुमतं[8] शतशः ॥३४॥
त्रिफलाकृतमालभवं क्वथनं सितया मधुना युतमा हरति ।
ननु दाहयुतास्रकपित्तरुजं किल पित्तजशूलदरं प्रवरम् ॥३५॥

१. '०षधे च'—अ, आ. २. 'निहन्ति'—अ. ३. 'दुरेण'—अ. ४. '०स्या'—अ. ५. '०धातुकां'—आ. ६. '०जातीम्'—अ. ७. 'लेपनतो भवं'—अ, आ. ८. '०मितं'—अ, आ.

पवनारिजटा द्विपलाष्टगुणे सलिले पचिता यवजेन युतम् ।
क्वथनं हृदयोद्भवपार्श्वकटीकफशूलविदारणसिंहनखः[१] ॥३६॥

गुदावर्तचिकित्सा

[२]आगारधूमबिडरामठदन्तिरास्नाकङ्कुष्ठसैन्धवगुडत्रिफलावृता च ।
वर्तिर्जलेन च गवां हि गुदे नियुक्ता विड्ग्रन्थिजातरुजमा हरति क्षणेन ॥३७॥

गुल्मादिचिकित्सा

हिङ्गु वचाबिडविश्वकजीरहैमवतीनवपुष्करकुष्टम् ।
चूर्णमिदं [३]क्रमवृद्धमशेषगुल्मविषूचिघनोदरसामे ॥३८॥
[४]गजचिर्भटपूतिचव्यवह्निलवणानि त्रिकटु त्विदं च दग्ध्वा[५] ।
दधिमस्तुयुतं निहन्ति पाण्डुमुदरं गुल्मगुदोद्भवानि [illegible]
उग्रा भल्लातकाजाजीमोदको गुडमिश्रितः ।
प्लीहानं नाशयत्येव दारुणं सप्तरात्रतः ॥ [illegible]
सामुद्रमष्टकर्षं च सौवर्चं पञ्चकर्षकम् [illegible]
ग्रन्थिकं सैन्धवं धान्यं चपला बिडपत्रकम् [illegible]
आम्लवेतसतालीसकृष्णजीरकमेव च [illegible] ॥१२॥
नागकेसरकं सर्वं द्विकर्षं च पृथक्पृथक् । [illegible]
वल्लिजं जीरकं शुण्ठी कर्षकर्षं च योजयेत् [illegible]
अर्धकर्षे त्वगेले च चतुःकर्षं हि दाडिमम् ॥४३॥
चूर्णीकृतं समस्तं च लवणं भास्कराभिधम् ।
आसवेन च तक्रेण मस्तुना वा हि योजयेत् ॥४४॥
सेवितं षाणमात्रं तु विड्बन्धं च भगन्दरम् ।
श्वासं कासं च शूलं च क्षयं प्लीहानमेव च ॥४५॥
वातश्लेष्मभवं गुल्ममुदरं कुष्ठमेव च ।
अर्शांसि ग्रहणीं शोफामग्निमान्द्यं च हृद्गदम् ॥४६॥
सामदोषं नाशयति दीपनं पाचनं परम् ।
लोकानां च हितार्थाय भास्करेण प्रयोजितम् ॥४७॥
त्र्यूषणं पञ्चलवणं वल्लमात्रं च ताम्रकम् ।
गुल्मशूलं हरत्येव विषूचीशूलवारणम् ॥४८॥
कम्पिल्लकादेकपलं नियोज्यं त्रिवृत्पलं स्नुक्पयसः[६] पलं च ।
धात्रीरसस्यापि चतुःपलानि पलार्धकं तल्लवणस्य योज्यम् ॥४९॥
एषां घृते पक्वमिदं गवां च प्रस्यार्धकं सर्पिरतीव सिद्धम् ।
एतन्महाबिन्दुघृतं प्रसिद्धं निहन्ति गुल्मं जठराणि चाष्टौ ॥५०॥

१. '०नखा'—अ, आ. २. 'आङ्गार०'—आ. '०शेषं'—अ. ४. अतः प्राक् '१' इत्यङ्कः अ आ पुस्तकयोर्दृश्यते. ५. 'दग्धा'—अ. ६. 'स्नुः पयसः'—अ, आ.

प्लीहानमुग्रं भिषजा[1] प्रयुक्तं विरेकयोगात्सुखदं नराणाम् ।
गुल्मोदराब्धेः किल कुम्भजन्मा परीक्षितं तत्कविराघवेण ।।५१।।

इति श्रीकविकुलावतंसश्रीकृष्णपण्डितसूनुश्रीमद्भिकंभट्टसूरिसुतश्रीमद्रघुनाथपण्डितकविविरचितायां राघवीयायां चिकित्सामञ्जर्यां रक्तपित्तादिचिकित्सा नाम चतुर्थं कुसुमम् ।।४।।

पञ्चमं कुसुमम्

हृद्रोगचिकित्सा

नागरं कणा ग्रन्थिकं निशा चित्रकस्तथा वारिदो गदः ।
एभिरम्बु वा हृद्गते गदे बोलवासितं[2] क्षौद्रमिश्रितम् ।।१।।
अर्जुनस्वरसेनैव साधितं च गवां घृतम् ।
[illegible] हृदयोद्भूतां व्यथां परमदारुणाम् ।।२।।

मूत्रकृच्छ्रचिकित्सा

[illegible]लकानां पाषाणभिद्धन्वयवासकानाम् ।
[illegible] कषाय एषां [3]विबन्धकं दाहयुतं च कृच्छ्रम् ।।३।।
[illegible] भेदकतुटि प्रचूर्णीकृतं
[illegible]ति वल्ल[illegible] गुडयुतं च वा सेवते ।
[illegible]लोदकयुतं च संजीवति
मुमू[illegible] कठिनमूत्रकृच्छ्रात्सदा ।।४।।

अश्मरीचिकित्सा

वातारिकौन्तीमधुकाश्मभेदगोकण्टकृष्णातृटिकावृषाणाम् ।
क्वाथो निहन्त्यश्मजतुप्रकीर्णः कृच्छ्राश्मरीदाहविकाररोगम्[4] ।।५।।
पाषाणभित्काशदुरालभानां सराजगोकण्टशिवाकुशानाम् ।
क्वाथोऽश्मरीं क्षौद्रयुतो[5] निहन्ति तथा शृतं किंशुकजं सिताढ्यम् ।।६।।

मूत्राघातचिकित्सा

पलद्वयं मूलकपत्रकाच्च कर्कटिकीबीजकसारचूर्णम् ।
पाषाणभित्कल्कसितायुतं च योज्यं[6] सदाहे किल मूत्रघाते ।।७।।

प्रमेहचिकित्सा

विभावरीरजःसमं समाक्षिकं मनोरमम् ।
हरीतकीशृतं परं निहन्ति मेहजं दरम् ।।८।।

---

१. '०षजैः'—अ, आ. २. '०वापितं'—अ, आ. ३. 'विबन्धके दाहयुते च कृच्छ्रे'—अ, आ. ४. '०रोगे'—अ, आ. ५. '०युतेन हन्ति'—अ, आ. ६. 'युज्यं'—अ, आ.

गोकण्टहिङ्गु त्रिफलाहरिद्राकलिङ्गनिम्बाब्दकर्कर्णिकैश्च ।
गायत्रिकादारुवृषैर्निहन्ति[1] विंशत्प्रमेहान्मधुनावलेहः ॥९॥
फलत्रिकं विशालका पयोधरश्च दार्विका ।
यतः शृतं निशायुतं निहन्ति मेहमाततम् ॥१०॥
पचम्पचासुराब्दजं शृतं भयं प्रमेहजम् ।
समाक्षिकं च सत्वरं निहन्त्यहोऽतिदुस्तरम् ॥११॥
पयो गवां सखण्डकं त्रिकण्टवङ्गवल्लकम् ।
प्रमेहभल्लकं परं बुधा वदन्ति सादरम् ॥१२॥

मेदोदोषचिकित्सा

बिल्वादिपञ्चमूलानां क्वाथः क्षौद्रेण मिश्रितः ।
जयेदतितरां सद्यो मेदोदोषं च दारुणम् ॥१३॥

उदरचिकित्सा

कटुत्रिकं त्रैफलदन्तिमूलं द्रवन्तिकारोहिषवल्क[illegible]
एषां कषायो यवजेन युक्तः सर्वोदरं हन्ति[illegible]
द्वौ क्षारौ पञ्चलवणं हपुषा जीरकं सठ[illegible]
व्योषाजगन्धा धान्यं च वह्निकङ्कोलकुष्टकम्[illegible] ॥१२॥
उग्रोपकुञ्चिकावेल्लं करवी ग्रन्थिकं वरा [illegible]
निशायुग्मं पुष्करकं यवानी तुल्यशस्ततः ॥[illegible]
[2]त्रिवृद्विशाले द्विगुणे त्रिगुणा दन्तिनी स्मृता ।
यवतिक्ता चतुर्भागा चूर्णं नारायणाभिधम्[3] ॥१७॥
कोष्णेन वारिणा वाथ यवकोलकुलित्थजैः ।
तक्रेण वा तत्सततं दधिमस्तुसुरासवैः ॥१८॥
पिवतस्तस्य नश्यन्ति चोदराणि च सर्वशः ।
यथा नारायणो देवो दुष्टदैत्यनिवर्हणः ॥१९॥
उदरेषु च सर्वेषु तथा योगः प्रकीर्तितः ।
पलोन्मितं गवां मूत्रैः शोफोदरहरं परम् ॥२०॥
पटोलादिशृतैः पाण्डुं कामलां च[4] हलीमकम् ।
एतन्नारायणं चूर्णं सर्वोदरनिकृन्तनम् ॥२१॥
पटोलिकावेल्लवराश्च मूलं पत्रं निशा तुल्यविभागमेतत् ।
पिचुद्वयं नीलिनिका [5]पलं च त्रिवृत्पलं कम्पिलकं पलार्धम् ॥२२॥
समूत्रमेतद्विनिहन्ति पाण्डुं शोफां च सर्वोदरकं च सद्यः ।
सकामलं रोगचयं हि पानात्पटोलकादिं प्रवदन्ति धीराः ॥२३॥

---

१. '०दारुद्रुशैं०'—अ, आ. २. 'त्रिवृद्वि०'—अ, आ. ३. '०भिदम्'—अ. ४. 'यां'—आ.
५. 'फलं'—अ, आ.

यवतिक्तात्रायमाणा हपुषा नीलिनी तथा ।
कङ्कुष्ठसैन्धववरावचाकृष्णाश्च चित्रकः ॥२४॥
रोहिणी च तथा तिक्तश्चूर्णं तत्त्रिवृता युतम् ।
सर्वोदराणि हन्त्येतद् भास्करेण तमो यथा ॥२५॥

अण्डवृद्धिचिकित्सा

सिंहमुखीपवनारिशताह्वापावकमन्थनसैन्धवदेवैः ।
साधितलेपत एव निहन्ति वृद्धिगदं श्वयथुं वृषणस्य ॥२६॥

गलगण्डचिकित्सा

काञ्चनारवराजातं शृतं मागधिमिश्रितम् ।
त्रिफलाज्यं यदा भुङ्क्ते हन्ति तं गलगण्डकम् ॥२७॥
[illegible]रसाज्ज्ञेयं कटुतैलं चतुर्गुणम् ।
[illegible] सर्वं पक्वं तैलं च दारुणम् ॥२८॥
[illegible]स्य गलगण्डो विनश्यति ।
[illegible] रविणा तिमिरं यथा ॥२९॥

गण्डमालाचिकित्सा

[illegible]तमूलस्नुक्चित्रकैस्तैर्गुडसूर्यदुग्धैः ।
समि[illegible]शेषाद् गच्छन्ति [2]तूर्णं किल गण्डमालाः ॥३०॥

विपादिकाचिकित्सा

[3]गैरिकामदनसिन्धुजवालक्षौद्रगुग्गुलुघृताक्तविलेपात्[4] ।
पादयुग्मनितरांस्फुटितं च फुल्लपङ्कजनिभं प्रतिभाति ॥३१॥

श्लीपदचिकित्सा

नागरस्य वा [5]क्वाथितं शृतं निम्बजं पिबेद्देवदारुजम् ।
क्षौद्रसंभृतं[6] श्लीपदे गदे सर्षपैस्तथा लेप एव च ॥३२॥

विद्रधिचिकित्सा

पलत्रयं वरायास्तु द्विपला चपला मता ।
पुरात्पञ्च पलानि स्युस्त्रिपलो[7] गुग्गुलुः स्मृतः ॥३३॥
भगन्दरे विसर्पे च गण्डमालाव्रणेषु च ।
विपक्वे विद्रधौ देयस्तथा च त्रिफलाघृतम् ॥३४॥

१. '०रजा०'—आ. २. 'चूर्णं'—अ, आ. ३. 'गौरि०'—आ. ४. '०गुग्गुल०'—अ, आ. ५. 'क्वथितं'—आ. ६. '०संमिदं'—अ, आ. ७. '०स्त्रिफला'—अ, आ.

पुनर्नवा [1]च वारुणस्तयोश्च साधितं शृतम् ।
मुनीन्द्रषट्पदसेवितं निहन्ति विद्रधिं ततम् ॥३५॥
शिग्रुनिशायुगकुञ्जरभक्ष्यवारुणदीप्यकषायक एषः ।
बोलरजःसहितो विनिहन्ति जाठरकं किल विद्रधिरोगम् ॥३६॥

व्रणचिकित्सा

फलत्रिकोद्भवं सदा कषायकं पिवेन्मुदा ।
पुरेण मिश्रितं व्रणं जयेदसौ च दारुणम् ॥३७॥
रसकखदिरसर्जा[2] भृष्टतुत्थं ससिक्थं
सघृतकपिलसिन्दूरं च शीर्षस्य तैलम् ।
गुणगुणशिखिचन्द्राः सूर्यविशद्रसाश्च
गुणरविमितमेतत्सिद्धसर्पिर्व्रणे च ॥३८॥
सिक्थकं तथा शङ्खजीरकं शीर्षतैलकं सर्जखादिरौ ।
गोघृतं व्रणे साधितं त्विदं सिद्धिदं भवेद्रोगना[illegible]

शोफचिकित्सा

त्र्यूषणं तृटित्वग्दलं समं चूर्णितं लिहेत्क्ष[illegible]
क्षौद्रसंयुतं शोफनाशनं वन्दितं सदा भैषज[illegible] ॥१२॥
पुनर्नवादारुनिशागुडूचीगौरीप्रपथ्याभृगुजाग्नय[illegible]
विश्वा सुराह्वा शृतमस्य हन्ति कराङ्घ्रि[illegible]
पुनर्नवानागरदारुपथ्याछिन्नोद्भवासंजनितः [illegible]
गवां च मूत्रेण[3] पुरेण मिश्रः शोफोदरारण्यदवाग्निरेषः ॥४२॥
पुनर्नवानिम्बपटोलदार्वीपथ्यागुडूचीकटुभङ्गतिक्ताः[4] ।
एषां कषायः किल पीयमानो गोमूत्रमिश्रः प्रसभं निहन्ति ॥४३॥
सर्वाङ्गशोफां पाण्डुं च श्वासकासोदरं तथा ।
शूलाध्मानौ भ्रमं चैव शोफरोगांश्च रोगिणः ॥४४॥

भगन्दरचिकित्सा

लेपेन पूर्वं प्रशमं प्रयाति [5]जलौकयाधोरुधिरस्य शुद्धिः ।
विपक्वतां सा पिटिका[6] प्रयाता गुदोपकण्ठे किल कृच्छ्रसाध्या ॥४५॥
शस्त्रेण वा तप्तशलाकया वा [7]विदार्य शुद्धां व्रणवच्चिकित्सेत् ।
गोधूमपथ्यं लवणेन हीनं क्षौद्रं हितं तत्र भगन्दराख्ये ॥४६॥
[8]फलत्रिकोद्भवं सदा कषायकं पिवेन्मुदा ।
पुरेण मिश्रितं व्रणं जयेदशौचदारुणम् ॥ ४७ ॥

---

१. 'वचारुण०'—अ, आ. २. '०सर्जभ्रष्ट०'—अ, आ. ३. 'मिश्रेण'—अ, आ. ४. '०भटु०'— अ, आ. ५. '०याधो'— आ. ६. 'पिटिता'—अ. ७. 'विदारयेत्'— आ. ८. एतदादि ३७-३९ अङ्कवत्पद्याभिन्नप्रायं पद्यत्रयं प्रागिलिखितमपि पश्चान्निष्कासितं दृश्यते आ पुस्तके.

रसकखदिरसर्जा[1] भृष्टतुत्थं ससिक्थं
सघृतकपिलसिन्दूरं च शीर्षस्य[2] तैलम् ।
गुणगुणशिखिचन्द्राः सूर्यविंशद्रसाश्च
गुणरविमितमेतत्सिद्धसर्पिर्व्रणे च ॥ ४८ ॥
सिक्थकं तथा शङ्खजीरकं शीर्षतैलकं सर्जखादिरौ ।
गोघृतं व्रणे साधितं त्विदं सत्वरं भवेद्रोगनाशनम् ॥ ४९ ॥

इति श्रीकविकुलावतंसश्रीकृष्णपण्डितसूनुश्रीमद्भिकंभट्टसूरिसुतश्रीमद्रघुनाथपण्डितकविविरचितायां राघवीयायां चिकित्सामञ्जर्यां हृद्रोगादिचिकित्सा नाम पञ्चमं कुसुमम् ॥ ५ ॥

षष्ठं कुसुम

त्वगामयचिकित्सा

[illegible]जीरद्वयरात्रियुग्ममनःशिलावल्लिजगन्धकानाम् ।
[illegible]नां घृतयोजितानां पामा व्रजेद्दूरतरं त्रिलेपात् ॥ १ ॥
[illegible]रीवरादेवदारुनिम्बच्छिन्नारोहिणीद्वाय एषः ।
[illegible]मां वातरक्तं कपालि तद्वत्कुष्ठं मण्डलं रक्तजन्यम् ॥ २ ॥
[illegible] सर्जरसो [3]यावशूकस्त्विदं त्रयम् ।
[illegible]षितं सर्वं सिध्ममूलविदारकम्[4] ॥ ३ ॥
[illegible]वगौरा[illegible]दतुत्थजीरवल्लीभवं कर्षमिदं पृथक्च ।
शिलावली तौ रसकर्षसंख्यौ सार्धो विभागः किल पारदस्य ॥ ४ ॥
कर्षैश्च विंशत्प्रमितैर्घृतस्य सर्वं विमर्द्य किल ताम्रपात्रे ।
इत्थं हि योगाद्रघुनाथयोज्याद्विहन्ति रोगी गजकर्णपामाम् ॥ ५ ॥
करवीरजटास्नुहीगदैश्च विषसिन्धूद्भवतालसूर्यभृङ्गैः ।
पचितं च चतुर्गुणे हि मूत्रे तिलतैलं विनिहन्ति सर्वरोगान् ॥ ६ ॥
पामां दद्रुं च कुष्ठं च पिटिकां च विचर्चिकाम् ।
कण्डुं शाखागतं वातं हन्ति लेपनतः परम् ॥ ७ ॥
पाठामेचकिरातनिम्बकटुकात्रायन्त्यनन्तामृता—
मूर्वावत्सकमागधीशतपदीशम्पाकराजीफलैः ।
ह्रीबेरातिविषानिशायुगवचासप्तच्छदारेणुभि—
र्यष्टीचन्दनसारिवायुगवरापद्मविशालावृषैः[5] ॥ ८ ॥
एतैः साधितमष्टभागनिशृतं त्वर्धं च धात्रीरस—
स्तस्यार्धं च गवां घृतं विपचितं सर्पिर्महातिक्तकम् ।

---

१. '०सर्जभ्रष्ट०'—अ. २. 'शीरस्य'—अ. ३. '०शूल०'—अ, आ. ४. '०शूल०'—अ, आ. ५.'०पद्यो०'—आ.

पाण्डुश्लीपदशोफमण्डलरुजं वातास्रकण्डूं तथा
हन्त्येतद् गलगण्डकं च सकलं कुष्ठानि चाष्टादश ।। ९ ।।

शीतपित्तचिकित्सा

दुःस्पर्शामृतमेघपांसुमधुकव्याघ्रीशिवाजाजिकैं—
र्वासोशीरमहौषधैश्च विहितः कृष्णामधुभ्यां युतः ।
क्वाथो मूर्छनमस्रशोथमनिशं सर्वज्वरं भ्रान्तिकां
दाहस्वेदगदं दिवानिशिभवं वैषम्यदोषं जयेत् ।। १० ।।

लाक्षानिशाचित्रकरवतयष्टिसौवर्चविश्वागदमोरटाभिः[१] ।
तक्रे पचेत् षड्गुणिते च तैलं विलेपतः शीतविदाहहारि ।। ११ ।।

कुष्ठचिकित्सा

क्षुद्रामृतानिम्बवराकरञ्जपटोलवासाशृतस[illegible]
गवां घृतं सिद्धमिदं पिबेच्च कुष्ठापहं त[illegible] ।
त्रिफलापिचुमन्दवचाकटुकारुणयष्टि[illegible]
क्वथितं सलिलं रसितं हरते ननु पित्त[illegible] ।।१३।।

आम्लपित्तचिकित्सा

त्रिफलामृतनिम्बपटोलरजोवृषपर्वतमा[illegible]न् ।
क्वथनं मधुना विनिहन्ति सदा ननु नष्टमिदं परपित्तमपि ।। १४ ।।
पटोलीयवकृष्णानां क्वाथश्च मधुना सह ।
आम्लपित्तं निहन्त्याशु वमिं चारोचकं तथा ।। १५ ।।

विसर्पचिकित्सा

अरिष्टवासात्रिफलापटोलीछिन्नोद्भवाखादिरवल्कलानाम् ।
एषां कषायः किल साधितश्च स्यात्सौख्यकारी सततं विसर्पे ।। १६ ।।

विस्फोटकचिकित्सा

रामसेनमेघनिम्बधन्वयासपर्पटैः रोहिणीपटोलिकामृताफलत्रिकावृषैः ।
स्फोटके च[२]तच्छृतं सुखप्रदं मतं गदे पण्डितेन्द्रभालरत्नराघवेण भाषितम् ।।१७।।
तुरुष्कः सार्धटङ्कश्च पारदश्च तथा मतः ।
सार्धद्विटङ्को दीप्यश्च तथाकल्लः प्रकीर्तितः ।। १८ ।।
भल्लातः पञ्चटङ्कश्च यवानी च तथा मता ।
अष्टादशदिनेष्वेवं सायंप्रातर्भजेदिदम् ।। १९ ।।

१. '०मोर०'—अ, आ. २. 'तत्स्रुतं'—अ, 'तत्सतं'—आ.

अनुपानं जलं ज्ञेयं पथ्यं गोधूमशालिजम्[1] ।
क्षाराम्लवर्जनीयं च चन्द्रके स्फोटके हितम् ॥ २० ॥
दुःस्पर्शक्वाथगण्डूषाः कार्याः पाके मुख[illegible]य च ।
क्षाराम्रास्थि तथोत्तारः शतशोऽनुमतं त्विदम् ॥ २१ ॥

कण्ठरोगचिकित्सा

वृकीकलिङ्गकटुकावृषामरपयोधरैः ।
मधुमान्कण्ठरोगारिः क्वाथो गोमूत्रसाधितः ॥ २२ ॥
कलिङ्गपाठाघनदारुतिक्तावृषाकृतो मूत्रयुतो गवां च ।
क्षौद्रेण पेयो गलजे च रोगे कषायकोऽसौ शतशोऽनुभूतः ॥ २३ ॥
रसाञ्जनं दारुनिशे सरास्ने यवाग्रजस्तेजवती च पाठा ।
एषां गुटी क्षौद्रयुता च[2] कार्या मुखे धृता कण्ठगदान्निहन्ति ॥ २४ ॥

मुखरोगचिकित्सा

[illegible]सजातीप्रवालधारात्रिफलाकषायः ।
[illegible]कमाशु निपीयमानो विनिहन्ति तीव्रम्[3] ॥ २५ ॥
[illegible]तानिशातन्दुलजैर्जलैः ।
[illegible] च घनयुग्मुखरोगहृत् ॥ २६ ॥
[illegible]ः सर्षपा लवणं गुडः ।
[illegible] मुखरोगं विनाशयेत्[4] ॥ २७ ॥
[illegible]बारसः पक्वः कटुतैलेन मिश्रितः ।
निहन्ति मुखजान्रोगान्दारुणान्मुखधारणात् ॥ २८ ॥

दन्तरोगचिकित्सा

पीतिका[5] रोहिणी मेघदार्वीगदास्तेजिनी लोध्रको वा समङ्गा वृकी ।
चूर्णमेषां समं घर्षयेत्सादरं रक्तकण्डूरुजं दन्तजां नाशयेत् ॥ २९ ॥
छिन्नया पिष्टया वारा दन्तशूलो विनश्यति ।
स्वेदिता[6] रवितोयेन चलतां नाशयेद् ध्रुवम् ॥ ३० ॥
एलार्धं तुल्यकं ज्ञेयं रत्नज्योतिर्हिराकशी ।
मायाफलं च त्रिफला खदिरो लोहकीटकम् ॥ ३१ ॥
समभागानि सर्वाणि पिष्ट्वा दन्तान्विघर्षयेत् ।
दन्तरोगा विनश्यन्ति चाञ्चल्यं हरते ध्रुवम् ॥ ३२ ॥

---

१. '०लितम्'—अ, आ. २. 'कुर्यात्'—अ, आ. ३. 'तीव्राम्'—अ, आ. ४. 'विनश्यति'—अ, आ. ५. 'पितिका'—अ, 'पित्तिका'—आ. ६. 'खेदिता'—आ.

कर्णरोगचिकित्सा

रविपर्णं घृताक्तं च पक्वं तप्तं निपीडयेत् ।
कर्णरन्ध्रे कदुष्णं च कर्णशूलनिवारणम् ।। ३३ ।।

सैन्धवं रामठो विश्वा वचा दारुमिशीगदाः ।
कर्णे भृताः पूतिपक्वं रोगं घ्नन्ति त्वजाम्भसा ।। ३४ ।।

दग्धं वराटं क्षुण्णं च निम्बुनीरेण पूरयेत् ।
कर्णे कर्णगदान् हन्ति रघुनाथेन दर्शितम् ।। ३५ ।।

गोमयोत्थरसस्तैलं मिलितं पाचितं समम् ।
पूरितं कर्णरन्ध्रे च कर्णशूलं निहन्ति च ।। ३६ ।।

जीवन्तीमधुकमिशीविडङ्गरास्नात्वक्शुण्ठीतगरपटुप्रकम्पनारि ।
पक्वं [1]तद्यवजयुतं सभृङ्गतैलं षड्बिन्दु श्रवणशिरोरदव्यथाघ्नम् ।। ३७ ।।[2]

नासारोगचिकित्सा

वल्लगोधूमभोजी च निद्राकाले च शीतलम् [illegible]
जलं पिबति यो रोगी पीनसान्मुच्यते नर[illegible]

प्रातःकाले जलं शीतं नासारन्ध्रेण यः पि[illegible]
पीनसान्नेत्ररोगाच्च पलितान्च विमुच्य[illegible]

तालीसं दहनतुगाम्लवेतसं च व्योषाजीवक[illegible] ।।१२।।
संक्षुण्णं गुडमिलितं [4]त्रिजातयुक्तं [5]वैस्वर्या[illegible]

कोकम्बस्वरसः शुद्धस्तक्रेण सह नस्यत[illegible]त् ।
तस्य पर्णानि पिष्ट्वा च बध्नीयान्नासिके तथा ।। [illegible]पित्तमपि ।। [illegible]

पतन्ति कीटकाः सद्यो योगोऽयं त्रिदिने हितः ।
पीनसान्मुच्यते रोगी शतशोऽनुमतं त्विदम् ।। ४२ ।।

सर्पिषा [6]मृष्टया धात्र्या शिरसो लेपतः क्षणात् ।
नासायां संप्रवृत्तं च रुधिरं च विनश्यति ।। ४३ ।।

नेत्ररोगचिकित्सा

फलत्रिकामृताशृतं समाक्षिकोषणायुतम् ।
निहन्ति नेत्रजं गदं त्वनेकदुःखकोटिदम् ।। ४४ ।।

वासानिम्बकलिङ्गमेघकटुकीदार्वीपटोलीयव—
भूनिम्बामृतरक्तचन्दनवराविश्वाग्निवत्सैः कृतः ।

---

१. अत्र अ पुस्तकस्थं स्पष्टीकरणं 'तूप' इति. २. अत उत्तरं 'नागरसैन्धवमागधिमुस्ता-कुष्टवचालशुनं तिलतैलम् । अर्कसुपर्णविरसैः परिपक्वं कर्णरुजं शतमाशु निहन्ति ।।' इति पद्यमतिरिक्तत्वेन लिखितं दृश्यते आ पुस्तके. ३. '०मुञ्चति'—अ, आ. ४. '०नामक०'—अ, आ. ५. 'वैश्वर्या०'—अ, आ. ६. 'भ्रष्ट०'—अ, आ.

क्वाथो हन्ति च नेत्ररोगनिवहं [1]वैस्वर्यकं पीनसं
श्वासं कासमुरःक्षतं च सहसा शूलं ज्वरोचं तथा ॥ ४५ ॥

निम्बपल्लवस्त्र्यूषणं वचा सैन्धवो निशामेघचित्रकाः ।
बेल्लकं च कङ्कुष्ठका वृकी सर्वचूर्णितं त्वाजवारिणा ॥ ४६ ॥

एवं कृता वटी सिद्धा छायाशुष्कां हि कारयेत् ।
रात्र्यन्धं भृङ्गराजेन कामलां काञ्जिकेन च ॥ ४७ ॥

तिमिरं वारिणा हन्ति [2]पुष्पं दुग्धेन च स्त्रियः ।
गोवारा चिपिटं हन्ति पटलं मधुसर्पिषा ॥ ४८ ॥

सातलाफलं कामिनीपयोघर्षितं सदा रक्तिकामितम् ।
अञ्जने हितं मण्डलावधि [3]पुष्पवाटसौ हन्ति सादरम् ॥ ४९ ॥

रजस्वलास्पर्शहीनो रोगी क्षाराम्लवर्जितः ।
विद्वषा राघवेन्द्रेण शतशोऽनुमतं[4] त्विदम् ॥ ५० ॥

शिरोव्यथाचिकित्सा

[illegible] घृतेन युक्तनिःशृतम् ।
[illegible] निहन्ति दारुणम् ॥ ५१ ॥

[illegible]ायवासमहौषधानां[5] च पलं पृथक्च ।
[illegible]गतं वल्लद्वि पलानि चैषां वटी सा भ्रमहारिणी स्यात् ॥ ५२ ॥

[illegible]न शिरःपीडा तथार्धजा ।
[illegible]ऽपि कुष्टविश्वावचागदात् ॥ ५३ ॥

[illegible] दशमूलं च धन्वयासकिरातकम् ।
एषां क्वाथो निहन्त्याशु भ्रममूलां शिरोव्यथाम् ॥ ५४ ॥

शाल्मलीमागधीविश्वा वारिणा पेषिता भृशम् ।
नस्यतो लेपतो वापि घ्नन्ति पीडां शिरोभवाम् ॥ ५५ ॥

शिला लोध्रो मरीचं च पिप्पली समभागतः ।
वारिणा पेषितं सर्वमर्धशीर्षव्यथां हरेत् ॥ ५६ ॥

प्रदरचिकित्सा

दार्वीकिराताब्दरसाञ्जनश्रीभल्लातवासाजनितः कषायः ।
समाक्षिको हन्ति च [7]श्यामपीतं सितासितं वा प्रदरं सशूलम् ॥ ५७ ॥

रसजं तन्दुलीयाङ्घ्रिस्ताभ्यां च प्रसभं रजः ॥
मधुतन्दुलवारिभ्यां पीतं प्रदरनाशनम् ॥ ५८ ॥

नियमनस्वरसेन विमिश्रितैर्नियमनानिलशात्रवबीजकैः ।
विरचिता च वटी स्मरसद्मनि प्रतिधृता भगशूलविदारिणी ॥ ५९ ॥

---

१. 'वैश्व०'—अ, आ. २. 'पुष्पं'—अ, आ. ३. 'पुष्प०'—अ, 'आ. ४. '०मितं'—अ, आ. ५. '०यवासा०'—आ. ६. 'नश्यते'—अ, आ. ७. 'शाम०'—अ, आ.

स्त्रीचिकित्सा

गवाक्षिकाजटा परे धृता मनोजमन्दिरे ।
वियोगिनीजगर्भजं भयं निहन्ति कर्मजम् ।। ६० ।।

त्रिदिनं लाङ्गलीमूलं सिताढ्यं पिबते यदि ।
आढकीतैलमिश्रं च पूर्णगर्भोऽपि पात्यते ।। ६१ ।।

दुग्धेन [1]शाल्मलीपुष्पमृतौ पिष्टं तु या पिबेत् ।
न तस्यां जायते गर्भः कामिन्यां च विशेषतः ।। ६२ ।।

पञ्चाङ्गबिल्वजं चूर्णं काञ्जिकेन च या पिबेत् ।
वन्ध्यापि लभते गर्भं वृद्धा यदि विशेषतः ।। ६३ ।।

चलनं प्रथमे मासि गर्भस्य यदि जायते ।
औषधं च तदा देयं विचक्षणभिषग्वरैः ।। ६४ ।।

मृद्वीका ज्येष्ठिका चैवं चन्दनं रक्तचन्दनम् ।
गवां च पयसा पेयं स्थिरता जायते ध्रुवम् [illegible]

द्वितीये मासि गर्भस्य चलनं च भवेद्यदि [illegible]
पयसा च तदा पेयं [2]मृणालं नागकेसरम् [illegible]

तृतीये मासि चलनं जायते गर्भजं ध्रुवम् [illegible]
पयसालोडितं पेयं शर्करानागकेसरम् ।। [illegible] ।।१२।।

यदा गर्भस्य चलनं चतुर्थे मासि जायते [illegible]
तृष्णाशूलविदाहैश्च ज्वरेण च निपीडनम्[3] [illegible]म् ।
धातुकीकुसुमं चैव वालकं नागकेसरम् । [illegible]पित्तमपि ।। [illegible]
चन्दनं सर्पिषा दध्ना मधुना सितया पिबेत् ।। ६९ ।।

पञ्चमे मासि गर्भस्य चलनं कुत्रचिद्भवेत् ।
दध्ना च मधुना पेयं दाडिमीपत्रचन्दनम् ।। ७० ।।

षष्ठे मासि तु गर्भस्य चलता जायते यदा ।
गैरिका गोमयं भस्म कृष्णमृत्स्ना तथैव च ।। ७१ ।।

एतेषां साधितं प्राज्ञभिषजा च शृतं तदा ।
पेयं शीतं परं साकं सितया चन्दनेन च ।। ७२ ।।

सप्तमे मासि गर्भस्य चलनं जायते यदा ।
उशीरगोक्षुरघनसमङ्गानागकेसरम् । ।। ७३ ।।

सपद्मकं स मधुरं पाययेच्च विचक्षणः ।।
अष्टमे मासि चलनं गर्भजं यदि जायते ।। ७४ ।।

तदा च मागधीलोध्रौ मधुना पयसा पिबेत् ।
नवमे सुप्रसूतिः स्यादेवं गर्भस्य पोषणम् ।। ७५ ।।

१. '०पुष्प०'—अ. २. 'तणालं'—अ. ३. '०पीडितम्'—अ, आ.

कुमारचिकित्सा

लोध्रेभपिप्पलीवाला बालकातिसृतौ हिताः ।
क्षीरसो माक्षिकयुतो धातुकीकुसुमैः समम् ॥ ७६ ॥

जातीप्रवालपुष्पाणि माक्षिकेण युतानि च ।
मुखपाके प्रदेयानि मातुः पथ्यविधिर्हितः ॥ ७७ ॥

मुखपाके शिशोर्देयं तोयपिष्टं रसाञ्जनम् ।
योगः प्रसिद्धः प्रोक्तोऽयं रघुनाथमनीषिणा ॥ ७८ ॥

घनशृङ्गीविषाणां च चूर्णं हन्ति समाक्षिकम् ।
वान्तिं ज्वरं तथा चान्यन्मधुनातिविषारजः ॥ ७९ ॥

आध्मानवातसंफुल्लो दक्षकुक्षिः शिशोर्भवेत् ।
उत्फुल्लिका सा विख्याता [1]श्वासश्वयथुसंकुला[2] ॥ ८० ॥

[illegible]येज्जलौकाभी रक्तं च जठरे तदा ।
[illegible]घकङ्कोलातिविषाभवम् ॥ ८१ ॥
[illegible]मिश्रं पाययेन्मातरं भिषक् ।
[illegible]ं योज्यं क्षीरदोषनिवारणम् ॥ ८२ ॥
[illegible]पि दाहयेच्च शलाकया ।
[illegible]रं पृष्ठभागेऽथ वापि च ॥ ८३ ॥
[illegible] वृकी त्रैफलं तथा सिंहिकाद्वयम् ।
[illegible]थितं समं पाययेच्छिशुं फुल्लिकापहम् ॥ ८४ ॥

विषचिकित्सा

[5]पुष्पं धात्री कपित्थं च काश्मरी च शिरीषकम् ।
पेयं शीतजलैर्हन्ति विषं भुजगसंभवम् ॥ ८५ ॥

कोशातकीकुष्टवचामदनक्वाथ आखुजम् ।
विषं निहन्ति गोमूत्रैरथ वा कौशिकाशृतैः ॥ ८६ ॥

आरग्वधत्वग् रुचकं गुडूची श्लेष्मातकत्वग् बृहतीयुगं च ।
एषां गदः सर्वविषापहारी योगोऽयमास्तीकमुनिप्रणीतः[6] ॥ ८७ ॥

मयूरपिच्छं कचगोविषाणं[7] यवस्य धान्यस्य तुषश्च योज्यः ॥
कपोतविण्मूत्रमिदं च बीजं कार्पासजं वा सकलस्य चूर्णम् ॥ ॥। ८८ ॥

धूपो गदो वा कर्तव्यः सर्पमूषकदंशने ।
नश्यन्ति धूपतः सर्वे मूषकाश्च भुजङ्गमाः ॥ ८९ ॥

शिरीषपञ्चाङ्गनिशागोमूत्रं पेषितं त्विदम् ।
पीयमानं निहन्त्याशु विषं स्थावरजङ्गमम् ॥ ९० ॥

---

१. '०श्वमधु०'—अ. २. '०संकुलः'—अ, आ. ३. 'धात्री'—आ. ४. 'क्वथि०'—आ.
५. 'पुष्पं'—अ, आ. ६. '०मस्तीक०'—अ, आ. ७. '०षाणां'—अ, आ.

पललं रविदुग्धं च तैलं च गुडमिश्रितम् ।
अलर्कदष्टे पेयं च सिद्धयोगः प्रकीर्तितः ।। ९१ ।।
धत्तूरबीजं चपलाचूर्णं वा शरपुङ्खकः ।
योज्यं भिषग्वरैर्नित्यं सारमेयस्य दंशने ।। ९२ ।।

वमनविचारः

कणामदनसिन्धूत्थं मधुमिश्रं वमीकृते ।
मधुकक्वाथ इत्येव वमनार्थं हितो मतः ।। ९३ ।।
पित्ते भृङ्गरसः पेयो वमनार्थमथापि वा ।
पिष्ट्वा च मदनं सूक्ष्मं वमने पयसा पिबेत् ।। ९४ ।।
पटोलनिम्बसलिलं चाम्लपित्ते च वान्तिकृत् ।
लवणं घृतयुक्तं च वमने च सुखावहम् ।। ९५ ।।

विरेचनविचारः

मधुधात्रीयुतं चूर्णं बृहत्याश्च विरेचने ।
मार्कण्डी तालपर्णी च बालपथ्याथ वापि च [illegible]
प्रपथ्यासैन्धवकणाचूर्णमुष्णाम्बुना सह । [illegible] ।।१२।।
एतन्नाराचकं ख्यातं रेचनं च हितावहम् [illegible]
त्रिफला पारदो गन्धष्टङ्कणं[1] त्र्यूषणं समम् [illegible]न् ।
सर्वतुल्यस्तु जेपालो मर्दितं सकलं त्विदन् ।। [illegible] पित्तमपि ।। [illegible]
योज्यं च निष्कपादांशं कदुष्णेन च वारिणा ।
रेचनानां तु सर्वेषां दध्यन्नं स्तम्भने हितम् ।। ९९ ।।
त्र्यूषणं त्रिवृद्दन्तिचित्रकं त्रैफलं समं मर्दितं भवेत् ।
स्नुक्पयश्च तद् द्विगुणं मतं पाचितं त्विदं पञ्चगुञ्जकम् ।। १०० ।।
गुडमिश्रमिदं सेव्यं वज्रभेदिरसायनम् ।
अष्टोदराणि गुल्मांश्च निहन्ति क्षणमात्रतः ।। १०१ ।।

वाजीकरणं-कामोद्दीपनम्

मधुकचूर्णमिदं मधुना युतं घृतविमिश्रितमालिहति क्रमात् ।
पिबति तप्तपयो रजनीमुखे हरति दर्पमहो शतयोषिताम् ।। १०२ ।।
धात्रीगोकण्टधाराणां चूर्णं मधुघृतान्वितम् ।
लिहन्वृष्यो भवेत्सद्यो जीवेच्च शरदां शतम् ।। १०३ ।।
मधुना सर्पिषा वापि भावितं स्वरसैः रजः ।
विदार्याः किल दुग्धेन पीतं भुङ्क्ते वधूशतम् ।। १०४ ।।

1. '०ङ्कणः'—आ.

त्रिकण्टमर्कटीभवं नवोच्चटाविमिश्रितम् ।
हरेत्प्रमानिनीमदं[1] सितापयःसुपाचितम् ॥ १०५ ॥

केसरं नागरं चन्दनं शौण्डिकं कोलजातीफलं देवपुष्पं तथा ।
सर्पफेनो जयाकल्लकस्तूरिका[2] दिव्यकर्पूरकस्तुल्यशो[3] मर्दयेत् ॥ १०६ ॥

मधुमिलितमिदं सुसाधितं च मदनविलासरसो द्विगुञ्जमात्रः ।
युवतिशतविवृद्धदर्पहारी कविवरपण्डितराघवप्रणीतः ॥ १०७ ॥

चन्दनपङ्कविलिप्तकुचानां चञ्चललोचनमुग्धवधूनाम् ।
कामनिदाघवतां किल पुंसामौषधकं परिरम्भणमेव ॥ १०८ ॥

इति श्रीकविकुलावतंसश्रीकृष्णपण्डितसूनु[4]श्रीमद्द्विकंभट्टसूरिसुतश्रीमद्रघुनाथपण्डितकविविरचितायां राघवीयायां चिकित्सामञ्जर्यां त्वगामयादिचिकित्सा नाम षष्ठं कुसुमम् ॥६॥[5]

सप्तमं कुसुमम्

रसायनोपन्यासः

[illegible] चमत्कारिरसाश्चरकगोचराः ।
[illegible] हितार्थाय रोगिणां भिषजामपि ॥ १ ॥

१. रोगविघ्नगणेशरसः

[illegible]न्धशुल्वायसं च भुजङ्गस्तथा वत्सनागो[6] नृपश्च ।
[illegible] वल्लकं चानुपानै रसेशः सदा रोगविघ्नो[7] गणेशः ॥ २ ॥

२. वसन्तकुसुमाकररसः

[illegible]विषवङ्गमौक्तिकं विद्रुमायसमिदं विमर्दयेत् ।
वारियुग्मकपयःशतपत्रकन्दलीकमलकन्दनिशाभिः ॥ ३ ॥

जातिकामृगमदेन्दुवृषैश्च भावयेन्मुनिदिनं प्रतियोगम् ।
सिद्धिदश्च रसनायक एष राघवेण विदुषानुमतो[8]ऽपि ॥ ४ ॥

प्रमेहविषपाण्डुके ग्रहणिकाम्लपित्ते तथा
क्षये श्वसनशूलके कसनरक्तपित्ते हितः ।
कणामधुविमिश्रितस्तदनु सार्धगुञ्जामितो
वसन्तकुसुमाकरो गदगजेन्द्रकण्ठीरवः ॥ ५ ॥

३. वातविध्वंसनरसः

पारदः पन्नगस्ताम्रगन्धौ कणा लोहवङ्गौषधं वल्लिजं टङ्कणः ।
अभ्रकः सर्वमेतत्समं कारयेत्सार्धवेदं गरं याममाचूर्णयेत् ॥ ६ ॥

---

१. '०निनो'—अ. २. '०कल्लु०'—अ. ३. '०स्त्वल्पशो'—अ. ४. '०मुत०'—अ, आ. ५. अत उत्तरं 'श्रीवासुदेवाय नमः' इति अ आ पुस्तकयोः. ६. '०त्समागो'—अ. ७. '०विघ्ने'—अ, आ. ८. '०मितो०'—अ, आ.

आर्द्रकसिन्धुभवक्षितिधात्रीत्र्यूषणचित्रकभृङ्गगदैस्त्रिः ।
[1]त्रैफलवासकनिम्बुरसोनाङ्कोलजटाभिरिदं परिभाव्यम् ।। ७ ।।

कफशीतसमीरशूलमान्द्ये हृदपस्मारगुदामयेषु मौढ्ये ।
ग्रहणीप्लिहगुल्मदन्तबन्धे श्वसने चोदरके च कुष्ठरोगे ।। ८ ।।

वातविध्वंसनः सर्वरोगापहः संनिपातेभराड्दारकः केसरी ।
योगपीयूषविन्मौलिना सादरं राघवेन्द्रेण संमानितः सर्वदा ।। ९ ।।

४. प्रतापलङ्केश्वररसः

[2]इन्दुचन्द्रशशिवह्निपयोधिकुञ्जरस्वरसुधापतिसंख्यम् ।
सूतशून्यबलिवल्लिजलोहतोयजोत्पलविभूतिविषं च ।। १० ।।

रक्तिकात्रयमिदं किल चूर्णं संनिपातरदब्रन्धमशेषम् ।
सूतिकानिलधनुर्मरुतं च शृङ्गवेरसलिलेन निहन्ति ।। ११ ।।

त्रैफलामृतपुरार्द्रकवारा वल्लसंमितमिदं [3]गुदजांश्च ।
हन्ति तां ग्रहणिकामतिसारं योग्यपथ्यभजनैरनुपानैः [illegible]

प्रतापलङ्केश्वर एष सूतस्त्रैलोक्यसंतापहरः प्रसि[illegible]
हिताय शैलेन्द्रसुताप्रयुक्तः परीक्षितोऽयं कविरा[illegible]

५. रोगपञ्चाननरसः

सूतटङ्कौ वरा गन्धकस्त्र्यूषणं वत्सनागो घनस्तुल्यशो ।
भृङ्गनीरेण तद् गुल्मवातोदरं रक्तिकाभा वटी[illegible]
[illegible]र् ।
[illegible]पित्तमपि ।। १[illegible]

६. नवज्वरमुरारिरसः

त्रिःसप्तवारं रसकस्य चूर्णं निम्बुद्रवेण प्रतिभावितं च ।
विमर्दितं मृक्षणतस्त्रिवारं सेव्यो मुरारिर्नवजूतिपूर्वः ।। १५ ।।

७. कनकसुन्दररसः

गरलटङ्कणवल्लिजहिङ्गुलैः कनकबीजकणाबलिमिश्रितैः ।
दृढतरं विजयारसमर्दितैः कनकसुन्दर एष रसः स्मृतः ।। १६ ।।
[4]ज्वरातिसारग्रहणीवह्निमान्द्ये विशेषतः ।
जातीफलदधिभ्यां च योजनीयो भिषग्वरैः ।। १७ ।।

८. प्रमदानन्दरसः

कणा जातिजं हिङ्गुलं टङ्कणं च वराटं विषं हेमबीजं सविश्वम् ।
भृशं मर्दयेन्निम्बुनीरेण यामं तथा धूर्ततोयेन भृङ्गीरसेन ।। १८ ।।

---

१. '०रसेना०'—आ. २. अत्र क्रमेण १, १, १, ३, ४, ८, ७, १६ इत्यङ्कनिर्देशः अ आ पुस्तकयोः. ३. 'गुड०'—अ, आ. ४. '०हणी'—अ, आ.

अदभ्रे च मेहे विकारे ग्रहण्याः कफे वातशूले [1]सूतौ खण्डमेहे ।
प्रशस्तः सितासेवितः शुक्रकारी रसः सर्वदानन्दनामा प्रसिद्धः ॥ १९ ॥
चपलानवयौवनभिन्नमदाप्रमदागतदर्पहरः स रसः ।
कथितो रघुनाथविदा गतशोऽनुमतो[2] रसिकै रसराजपरः[3] ॥ २० ॥

९. गुह्यरोगहररसः

पारदष्टङ्कणो गन्धकः पद्मिनीकन्द एतद्रसैर्लिङ्गिजैर्मर्दयेत् ।
क्षौद्रसंभावितं स्त्रीगदान्गुह्यजान्वेदवल्लं पयःपीयमानं हरेत् ॥ २१ ॥

१०. आनन्दभैरवरसः

शौण्डी च टङ्कणविषं दरदो मरीचं चूर्णीकृतं च सकलं समभागमेतत् ।
आनन्दभैरवरसो ह्यतिसारमेहे गुञ्जामितश्च रघुनाथकवीन्द्रमान्यः ॥ २२ ॥

११. विश्वतापहरणरसः

[illegible] न्दुदन्तिबीजत्रिवृदभयाचपलार्करोहिणीनाम् ।
[illegible] श्वतापहारी कनकरसेन रसो नवज्वरघ्नः ॥ २३ ॥
[illegible] स्य वल्लयुगं भजेत् ।
[illegible] संयुतो मुद्गयूषया[4] ॥ २४ ॥

१२. लघुमालिनीवसन्तरसः

[illegible] तदर्धवल्लिजं तथा
[illegible] युतेन मुक्तकं भवेत् ।
[illegible] भागधीसमं ज्वरस्य कृन्तनं भजेद्
वदन्ति मालिनीवसन्तमेवमादिपण्डिताः ॥ २५ ॥

१३. विषप्रहारिरसः

टङ्कणतुत्थनिशाबलिसूतं वेणिजलेन विमर्दितमेतत् ।
नस्यविधानत एव निहन्ति कालभुजङ्गविषं नरवारा ॥ २६ ॥
विषप्रहारी विज्ञेयो रसः स्थावरजङ्गमम् ।
विषं हन्ति क्षणार्धेन तिमिरं द्युमणिर्यथा ॥ २७ ॥

१४. अग्निकुमाररसः

टङ्कणः पारदो गन्धशङ्खौ [5]कपर्दः समा वत्सनागस्त्रिभागस्तथा ।
वल्लिजं चाष्ट वा वह्निपूर्वः कुमारः स्मृतो भृङ्गनीरेण संमर्दितः ॥ २८ ॥
वातरोगेषु सर्वेषु श्वसने वह्निमान्द्यके ।
कफामये प्लिहे कासे शूले त्वग्निकुमारकः ॥ २९ ॥

---

१. 'श्रुतौ'—आ. २. '०मितो'—अ, आ. ३. '०राधप०'—अ. ४. '०मूष०'—अ.
५. 'कपर्दैः'—अ, आ.

१५. श्वासकुठाररसः

[1]सूतो विषं मरिचटङ्कणकं शिला च
गन्धः समं वसुमितानि च वल्लिजानि ।
एकैकशः खलतले परिमर्द्य सर्व
व्योषां च षट्परिमितां प्रहरं विघृष्य ।। ३० ।।
कूप्यां निरुध्य पुटितं किल पर्णखण्डे
गुञ्जामितं हितमिदं श्वसने च कासे ।
मन्दानले कफगदे किल संनिपाते
ऽपस्मारमूर्च्छनगदे भिषजा च देयम् ।। ३१ ।।
अत्यन्तमौढचयुक्ते च न देयश्च विचक्षणैः ।
रसः श्वासकुठारोऽयं रघुनाथेन सेवितः ।। ३२ ।।

१६. नवज्वरेभाङ्कुशरसः

गन्धोषणं शिवजटङ्कणकं समांशं पित्तेन मत्स्यजनि[illegible] ।
वल्लद्वयं च विहितं किल चात्र पथ्यं वृन्ताकशाक[illegible] ३३ ।।
घर्मोदकं संस्रवते [2]गदार्तिः सद्यः सुखी स्याद्[illegible]
नवज्वरेभाङ्कुशनामधेयः परीक्षितोऽयं कविर[illegible]

१७. वह्निकुमाररसः

पारदो गन्धकस्ताम्रकं हिङ्गुलो वत्सनागः समां[illegible]
याममात्रं रसैस्त्र्यूषणैर्वा त्रिधा पञ्चकोलेन वा[illegible]त् ।
वह्निकुमाररसः किल चैष शूलकफग्रहणीरनुपानैः ।[illegible]पित्तमपि ।। १[illegible]
हन्ति [3]जनाद्यरुजं त्वरुचिं वा पण्डितराजरघूत्तममान्यः ।। ३६ ।।

१८. वङ्गेश्वररसः

एकभागो रसो ज्ञेयो द्वौ भागौ वङ्गतो मतौ ।
वङ्गतुल्यो गन्धकः स्यात्कन्यकारसमर्दितम् ।। ३७ ।।
पक्त्वा च वालुकायन्त्रे मधुयुक् पिप्पलीयुतः ।
देयः सर्वप्रमेहेषु रसो वङ्गेश्वरः परः ।। ३८ ।।
पथ्यं क्षीरौदनं चाम्लं ताम्बूलं च विवर्जयेत् ।
त्यजेच्च वातिकं क्षारं रघुनाथेन सेवितः ।। ३९ ।।

१९. कपर्दवटिका

कपर्दवल्लिजं विषं [4]त्रिबाणनागभागिकम् ।
वटी च मुद्गमानिका मरुद्वलासहापिका ।। ४० ।।

१. 'सूतौ'—अ, आ. २. 'गदार्ती'—अ, आ. ३. 'जमाद्य०'—अ. ४. अत्र क्रमेण ३, ५, ८ इत्यङ्कनिर्देशः अ आ पुस्तकयोः.

२०. लघुवातविध्वंसनरसः

पारदष्टङ्कणो गन्धपाषाणभिद्वत्सनागा वराटस्तथा तालकः ।
त्र्यूषणं हेमनीरेण तन्मर्दयेद् रक्तिकाभा वटी वातविध्वंसनः ॥ ४१ ॥
संनिपातके मारुते कफे शीतमान्द्यके श्वाससंभवे ।
संग्रहाभिधे शूलजे गदे राघवेण संमानितो हितः ॥ ४२ ॥

२१. बृहन्मालिनीवसन्तरसः

कनकमौक्तिकहिङ्गुलवल्लिजं क्रमविवर्धितमष्टगुणं ततः ।
रसकमेवमिदं किल मृक्षणैः सरसनिम्बुरसेन विमर्दयेत् ॥ ४३ ॥
सर्पिषा विरहितं यदा भवेन्मर्दयेन्मधुकणायुतो रसः ।
रक्तिकाप्रमित एव गृह्यते यो वसन्त इति मान्यते परः ॥ ४४ ॥

२२. अजीर्णकण्टकरसः

[illegible]नागरसगन्धकाः समा वल्लिजं सकलतुल्यभागिकम् ।
[illegible]लरसेन मर्दितश्चैकविंशतिमितं विभावयेत् ॥ ४५ ॥
[illegible]दे हिता वटी च वल्लसंमिता ।
[illegible]हन्ति सा त्वजीर्णकण्टको रसः ॥ ४६ ॥

२३. उन्मत्तरसः

[illegible]धौ तुल्यभागौ तयोस्तुल्यं कटुत्रिकम् ।
[illegible]रेण दिनमेकं विमर्दयेत् ॥ ४७ ॥
[illegible]यन्ति संनिपातास्त्रयोदश ।
उन्मत्त इति विख्यातो रसः सर्वसुखप्रदः ॥ ४८ ॥

२४. सूचिकारणरसः

वत्सनागः पलमितः सूतः शाणिक एव च ।
चूर्णितं काचलिप्ते च शरावयुगलान्तरे ॥ ४९ ॥
निक्षिप्य मुद्रयेद् गाढं शुष्कं चुल्ल्यां निवेशयेत् ।
शनैश्च पावकं कुर्याद्यामद्वयमतः परम् ॥ ५० ॥
समद्घाटच च तत्सर्वमुपरिस्थशरावके ।
संलग्नधूमं गृह्णीयात्ततः कूप्यां[1] निवेशयेत् ॥ ५१ ॥
सूचिकारणनामायं रसः सर्वसुखप्रदः ।
क्षुरक्षुण्णे[2] मूर्धभागे संनिपातार्दितस्य च ॥ ५२ ॥
[3]यावत्सूच्या मुखे लग्नस्तावद्योज्यो रसः परः ।
अङ्गुल्या मर्दयेत्सद्यो रक्तभेषजयोगतः ॥ ५३ ॥
मूर्छां गतोऽपि मूढोऽपि यमपाशनियन्त्रितः ।
यमालयगतो वापि जीवत्येव न संशयः ॥ ५४ ॥

---

१. 'कूप्यां'—अ. २. '०क्षुण्णो'—आ. ३. 'यावच्छुच्या'—आ.

तथा सर्पेण दष्टोऽपि गतासुरपि जीवति ।
भवेद्दाहो यदा देहे मधुरं भक्षणे हितम् ।। ५५ ।।

२५. शीतारिरसः

सितमल्लमनःशिलाहिफेनरसकाम्भोधिजताप्यतुल्यभागैः ।
[1]सुषवीरसमर्दितैस्त्रिवारं भज शीतारिमिमं सितार्धगुञ्जम्[2] ।। ५६ ।।
ज्वरं निहन्ति सकलं तीव्रं शीतं महोल्बणम् ।
मात्रात्रयेण निःशेषं पथ्यं मुद्गौदनं स्मृतम् ।। ५७ ।।

२६. शीताङ्कुशरसः

तालकः पारदष्टङ्कणस्तुत्थकं वत्सनागो बलिः खर्परं तुल्यशः ।
कारवेल्लीरसैर्मर्दितो रक्तिकामात्र एषोऽरसः शीतपूर्वाङ्कुशः ।। ५८ ।।
अजाजीशर्कराभ्यां च विनिहन्ति च सर्वशः ।
पथ्यं दुग्धौदनं ज्ञेयं ज्वरानैकाहिकादिकान् ।। ५९ ।।

२७. सुखविरेकरसः

रसक्षारलोहं गदं गन्धकं च विमर्द्यापि जेपालतैले[illegible]
गुडच्छन्नगुञ्जामिता चास्य मात्रा सदामान्तरेची [illegible]

२८. इच्छाविभेदिरसः

पारदष्टङ्कणो वल्लिजं गन्धको नागरं सर्वमेतत्समं का[illegible]
स्याच्च जेपालभागद्वयं निम्बुनो वारिणेच्छाविभे[illegible]म् ।
वल्लमात्रो [3]गुडोन्मिश्रः सुखदायी रसः परः । [illegible]पित्तमपि ।। १[illegible]
यावन्तश्चुलुका[4] ग्राह्यास्तावद्रेकान्विरेचयेत् ।। ६२ ।।

२९. ज्वरारिरसः

पलमात्रा गजकणा पलमेकं च तालकः ।
अश्मचूर्णं वेदपलं [5]सुषवीरसमर्दितम् ।। ६३ ।।
वटी गुञ्जामिता ज्ञेया पथ्यं क्षीरौदनं स्मृतम् ।
शर्करासहितो [6]ग्राह्यो ज्वरारी रसनायकः ।। ६४ ।।

३०. महाशीताङ्कुशरसः

कर्षमात्रं तुत्थकं स्यात्तालकं द्विगुणं भवेत् ।
शङ्खं त्रिगुणकं सर्वं सुषवीरसमर्दितम् ।। ६५ ।।
ततो गजपुटं दत्वा रसोऽयं वल्लमात्रकः ।
सितानागरसंयुक्तः पथ्यं क्षीरौदनं स्मृतम् ।। ६६ ।।

---

१. 'मुखवी०'—अ, आ. २. '०गुञ्जाम्'—अ, आ. ३. 'गुडो मिश्रः'—अ, आ.
४. '०लका'—अ, आ. ५. 'मुखवी०'—अ, आ. ६. 'ग्राह्या'—अ.

क्षाराम्लवर्जनं तत्र कारयेद् भिषजां वरः[1] ।
महाशीताङ्कुशो हन्ति ज्वरानैकाहिकादिकान् ॥ ६७ ॥

३१. रामबाणरसः

तुत्थं गन्धस्तालकः सर्वमेवं भागै रामैः पञ्चषड्भिः[2] क्रमेण ।
[3]कन्याद्रावैर्मर्दितः पाचितश्च वल्लांशोऽयं सेव्यमानो ज्वरघ्नः ॥ ६८ ॥
क्षाराम्लं वर्जनीयं च पथ्यं क्षीरौदनं स्मृतम् ।
शर्करासहितो ग्राह्यो रामबाणरसः परः ॥ ६९ ॥

३२. ग्रहणीकपाटरसः

त्र्यूषणं टङ्कणं गन्धकं पारदं [4]सत्कपर्दं विषं निम्बुजैर्मर्दयेत् ।
माषमात्रं मरीचाज्ययुक्तं भजेत्संग्रहाख्ये गदे शर्करामिश्रितम् ॥ ७० ॥

अनुपानविवेकः

[5]वासास्रपित्तविहिता गुदजेऽनलश्च,
[illegible] च रामठघृतं मथितं ग्रहण्याम् ।
[illegible]ङ्गमलता मरिचं वमीषु
[illegible] कृमिहरं कुटजः सृतौ च ॥ ७१ ॥
[illegible]युता कणा च वाते रसोनः सघृतो नियोज्यः ।
[illegible]युतं च कासे ज्वरे सपांसुर्जलदः प्रशस्तः ॥ ७२ ॥
[illegible]सिताढ्या च हिता प्रमेहे क्षौद्रान्विताद्रं च तथा त्रिदोषे ।
[illegible] योग्यं किल चानुपानं योज्यं भिषग्भिः कुशलैस्तथान्यत् ॥ ७३ ॥

ग्रन्थोपसंहारः

[illegible]राय लोकानां भिषजां जीवनाय च ।
तथ्ययोगा लसद्वृत्ता चिकित्सामञ्जरी कृता ॥ ७४ ॥
ग्रहेन्दुरसचन्द्रे च शके विरचिता मुदा ।
वृषाब्दे [6]राघवीयेयं चिकित्सामञ्जरी मता ॥ ७५ ॥
किल बालमृगाङ्ककिरीटदयासदयस्य गुणप्रतिभावितते:[7] ॥
ननु [8]तर्कमुखाखिलवाग्रचनाघटिकाशतपद्यनिषण्णमतेः ॥ ७६ ॥
मनोहरकुलाम्भोधे रघुनाथविधोः सृजः ।
[9]वागुस्त्रैर्मे रसज्ञानां हृत्पद्मं विकसत्विह ॥ ७७ ॥
सतां पदरजःसञ्जातविस्फूर्तिराघवः ।
तस्य वाचां विलासोऽयं न धत्ते चारुतां कथम् ॥ ७८ ॥
स्थानं [10]कोल्लागिरिः पूर्वं ततश्चम्पावती पुरम् ।
[11]महालक्ष्मीः कुलाधीशा रघुनाथेन तेन च ॥ ७९ ॥

---

१. 'वरैः'—अ, आ. २. 'पञ्चशङ्घ्रिः'—अ, आ. ३. '०द्रवै०'—आ. ४. 'सकपर्दं'—अ.
५. 'वासाम्लपीत०'—अ, आ. ६. 'राघवीयं च'—अ, आ. ७. '०ततैः'—अ, आ.
८. '०ग्रवना०'—अ, आ. ९. 'वागस्त्रै०'—अ, 'वागस्त्रै०'—आ. १०. 'काल्ला०'—अ.
११. 'महालक्ष्मीः कलाधीशा'—अ, 'माहालक्ष्मीकलाधीशा'—आ.

गुम्फिता मञ्जरी कण्ठे ध्रियतां कविकोविदैः ।
योगपीयूषभरिता चमत्कारकरी[1] मता ।। ८० ।।
चेष्टितं च शिशोः किञ्चिज्जायते महतां मुदे ।
विधेया मञ्जरी कर्णे भूषणार्थमियं न वा ।। ८१ ।।

इति श्रीमत्कविकुलावतंसश्रीकृष्णपण्डितसूनु [2]श्रीमद्भिकंभट्टसूरिसुतश्रीमद्रघुनाथपण्डितकवि विरचितायां राघवीयायां चिकित्सामञ्जर्यां रसनिरूपणं नाम सप्तमं कुसुमम्[3] ।।७।।[4]

राघवीया चिकित्सामञ्जरी समाप्ता ॥

१. '०कवी'—आ. २. '०सूत'०—अ, आ. ३. अत उत्तरं 'समाप्तिमगमत् ।। छ ।।' इत्यधिकम् अ पुस्तके, 'समाप्तम् ।। छ ।।' इत्यधिकम् आ पुस्तके च.

४. ग्रन्थसमाप्तेः पश्चात्

"वटशुङ्गारक्तमज्जा आभिरभ्रं समर्दितम् ।
शतधा पुटितं भस्म जायते पद्मरागवत् ।।
समं टङ्कणं हिङ्गुलं चाहिफेनं सितं सिल्हकं माध[illegible] ।
कलापप्रमाणां निषेवेत मात्रां मुहुर्मूत्रयात्रा प्र[illegible]

शके १६८९ सर्वजिनामसंवत्सरे ज्येष्ठशुद्धद्वादश्यां रामचन्द्रेण[illegible]प्तिः।।

माहाव्याधि जाय यास औषध प्रकार ।। जळपिंपळीचा रस[illegible]यांत तूप च र पयसे भार ४ ।। हें औषध पांच दिवस घेणें समूळ व्याधि जाय ।।[illegible]ण भक्षिजे दिवस २१ ।। (भिन्नहस्ताक्षरेण—)

निम्बच्छदो दशपलं त्र्यूषणं च पल[illegible]न् ।
त्रिपलं त्रिफला चैव लवणं च पलत्रय[illegible]पित्तमपि ।। १[illegible]
द्वौ क्षारौ द्विपलं चैव यवानी पलपञ्चकम् ।
सर्वमेकीकृतं चूर्णं प्रत्यूषे भक्षयेन्नरः ।। २ ।।
एकाहिकं द्व्याहिकं च तथा त्रिदिवसं ज्वरम् ।
चातुर्थिकं महाघोरं संततं सततज्वरम् ।।
धातुस्थं च त्रिदोषोत्थं ज्वरं हन्ति च मानसम ।। ३ ।।

इति विशमशीतपूर्वकज्वरे चूर्णम् ।। चिकीतषामंजरी समाप्ता पत्रे ४६" इत्यधिकम् अ पुस्तके;

"शके १६९४ नन्दनाब्दे भाद्रपदमासे कृष्णपक्षे षष्ठ्यां तिथौ गुरुवासरे तद्दिने तृतीयप्रहरे केशोभटशुक्लेन लिखितं ।। श्रीशुभं भवतु ।। श्रीरस्तु ।।

बद्धमुष्टिकटिग्रीवा रधो द्रिटिः अधोमुखा ।
कष्टेन लिखितं ग्रंथं यत्नेन परिपाल्यते ।.'

इ त्यधिकम् आ पुस्तके च.

चिकित्सामञ्जरीनिर्देशसूचयः

सूचिस्थाः संकेताङ्काः कुसुमानां तद्गतपद्यानां च निर्देशकाः.

I. पद्यवृत्तानि

समग्रपद्यसंख्या—४५०

II. व्यक्तिस्थलादिवाचकविशेषनामानि तद्विशेषणानि च

III. चिकित्सितरोगारोग्यादिवाचकशब्दाः